वैयाकरणसिद्धान्तकौमुद्यां

कृदन्तप्रकरणम्

[१६] इडागमनिर्णयः

२०.०९.२०११

Neelesh Bodas

neelesh.bodas@gmail.com

vyóma

॥ वाचं धेनुमुपासीत ॥

Saṃskṛtam · Value Education · Technology

Email: sanskritfromhome@vyomalabs.in

www.sanskritfromhome.in



येनाक्षरसमाम्नायमधिगम्यमहेश्वरात्
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥

वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिम्
पाणिनिं सूत्रकारञ्च प्रणतोऽस्मि मुनित्रयम् ॥

मुनित्रयं नमस्कृत्य तदुक्तीः परिभाव्य च
वैयाकरणसिद्धान्तकौमुदीयं विरच्यते ॥

पुनःस्मारणम् - अस्य वर्गस्य प्रयोजनानि

vyomlabs
॥ वाचं धेनुमुपासीत ॥
Samskrtam · Value Education · Technology

- सिद्धान्तकौमुद्याः कृदन्तप्रकरणस्य सर्वेषां सूत्राणां विस्तारेण अध्ययनम् ।
- यत्र आवश्यकं तत्र अन्येषां व्याख्यानानां साहाय्येन शास्त्राध्ययनम् ।
- सर्वेभ्यः धातुभ्यः यथायोग्यं कृत्प्रत्ययययोजनम् ।
- कृत्प्रत्यये परे रूपनिर्माणप्रक्रियायाः अभ्यासः ।
- अष्टाध्याय्याः तृतीयाध्यायस्य कण्ठस्थीकरणम् ।

कृत्प्रत्ययप्रकारद्वयम्

vyomlabs
॥ वाचं धेनुमुपासीत ॥
Samskrtam · Value Education · Technology

कृत्प्रत्ययाः

सार्वधातुककृत्प्रत्ययाः

एतेषु कृत्प्रत्ययेषु इत्संज्ञकः शकारः विद्यते ।

आवली - शतृ, शानच्, चानश्, शानन्, खश्, श, शध्यै, शध्यैन्, एश् ।

आर्धधातुककृत्प्रत्ययाः

एतेषु कृत्प्रत्ययेषु इत्संज्ञकः शकारः न विद्यते ।

यथा - क्त, क्तवतु, अनीयर्, ण्वुल् ।

आर्धधातुकप्रत्ययस्य कुत्रचित् “इट्” इति आगमः भवितुम् अर्हति, स एव **इडागमः** ।

धातुः + (कुत्रचित्) **इडागमः** + **आर्धधातुकप्रत्ययः** = **कृदन्तम्**

इडागमः - सामान्यज्ञानम्

vyomlabs
॥ वाचं धेनुमुपासीत ॥
Samskrtam · Value Education · Technology

- इडागमः केवलम् **आर्धधातुकप्रत्ययानां** विषये एव भवितुम् अर्हति । सार्वधातुकप्रत्ययानां विषये न ।
- इडागमः इति **आगमः** अस्ति, आदेशः उत प्रत्ययः न ।
- इडागमः = इट् + आगमः । "**इट्**" इति अत्र आगमरूपेण विधीयते । अत्र टकारः इत्संज्ञकः, अतः तस्य लोपे कृते "इ" इत्येव अवशिष्यते । यथा - पठ् + इट् + तृच् → पठ् + इ + तृच् → पठितृ ।
- इडागमः **आर्धधातुक-कृत्-प्रत्ययस्य** आगमरूपेण विधीयते । धातोः आगमरूपेण न । यथा - पठ् + (इट् + तृच्) ।
- "इट्" इति आगमः **टित्** अस्ति । टित्त्वात् १.१.४६ आद्यन्तौ टकितौ इत्यनेन इडागमः प्रत्ययस्य आदौ विधीयते ।
- यदागमास्तद्गुणीभूताः तद्ग्रहणेन गृह्यन्ते (परिभाषा ११) अनया परिभाषया इडागमः **प्रत्ययस्यैव अवयवरूपेण** स्वीक्रियते । इत्युक्ते, "इडागमः + प्रत्ययः" इत्यस्य अपि प्रत्ययसंज्ञा एव भवति ।
- सर्वेषाम् आर्धधातुकप्रत्ययानाम् इडागमः **न भवति** । भवति चेदपि सर्वेषां धातूनां विषये **नैव भवति** ।

इडागमनिर्णयः - प्रथमं कोष्ठकम्

vyomaलोगो
॥ वाचं धेनुमुपासीत ॥
Samskrtam · Value Education · Technology

धातुपाठे पाठिताः धातवः त्रिधा - **सेट्, वेट्, अनिट्** । आर्धधातुकप्रत्ययानां प्रकारद्वयम् - **इट्-योग्यप्रत्ययाः, इट्-अयोग्यप्रत्ययाः** ।

	सेट् धातुः	**वेट् धातुः**	**अनिट् धातुः**
इट्-योग्यः आर्धधातुककृत्प्रत्ययः	इडागमः भवति ।	इडागमः **विकल्पेन** भवति ।	इडागमः **न** भवति ।
इट्-अयोग्यः आर्धधातुककृत्प्रत्ययः	इडागमः **न** भवति ।	इडागमः **न** भवति ।	इडागमः **न** भवति ।

अयं तु केवलं सामान्यनियमः । अस्यापि अनेके अपवादाः सन्ति ।

अतः **"कस्मात् धातोः विहितस्य कस्य प्रत्ययस्य इडागमः भवति"** इति स्पष्टरूपेण ज्ञातुम् सूत्रपाठस्य इडागमप्रकरणम् एव सम्पूर्णरूपेण अध्येतव्यम् ।

- ७.२.८ नेड् वशि कृति
- ....
- ७.२.७८ ईडजनोर्ध्वे च

इट्-योग्याः प्रत्ययाः

७.२.३५ (२१८४) आर्धधातुकस्येड् वलादेः	७.२.८ (२९८१) नेड् वशि कृति	७.२.९ (३१६३) तितुत्रतथसिसुसरकसेषु च
वलादेः आर्धधातुकस्य इडागम स्यात् ।	वशादेः कृतः इट् न स्यात् ।	क्त्विच्, क्तिन्, ष्ट्रन् - एतेषां इट् न ।

वल् = व्, र्, ल्, वर्गपञ्चमाः, वर्गचतुर्थाः, वर्गतृतीयाः, वर्गद्वितीयाः, वर्गप्रथमाः, श्, ष्, स्, ह

वश् = व्, र्, ल्, वर्गपञ्चमाः, वर्गचतुर्थाः, वर्गतृतीयाः

=

वर्गद्वितीयाः, वर्गप्रथमाः, श्, ष्, स्, ह

इट्-योग्य-प्रत्ययाः

स्नु, थकन्, क्त, क्तवतुँ, क्त्वा, तुमुन्, तव्य, तव्यत्, तृच्, तृन्, क्त्रि

सकारादयः	स्नु, क्से, से, सेन्
थकारादयः	थकन्
तकारादयः	क्त, क्तवतु, क्त्वा, तुमुन्, तव्य, तव्यत्, तृच्, तृन्, क्त्रि, ~~क्त्विच्~~, ~~क्तिन्~~, ~~ष्ट्रन्~~, तोसुन्, त्वन्, तवेङ्, तवेन्, तवै

इट्-योग्याः धातवः

७.२.१० (२२४६) एकाच उपदेशेऽनुदात्तात्

उपदेशे यो धातुः एकाच् अनुदात्तश्च ततः परस्य वलादेः आर्धधातुकस्य इट् न स्यात् ।

धातोः औपदेशिक-अवस्थायाम् इत्संज्ञकस्वराणां लोपं कृत्वा कति स्वराः अवशिष्यन्ते ?

- एकः
  - अनुदात्तः → प्रत्ययस्य इडागमः न भवति ।
  - उदात्तः → आर्धधातुककृत्प्रत्ययस्य इडागमः भवितुम् अर्हति ।
- द्वौ वा अधिकाः → आर्धधातुककृत्प्रत्ययस्य इडागमः भवितुम् अर्हति ।

धातुपाठे पाठिताः अनिट्-धातवः (~ ३००)

धातुपाठे पाठिताः सेट्-धातवः (~ १६५०)
वेट्-धातवः (~ ४०)

इट्-योग्यप्रत्ययानां चिन्तनम्

vyomlabs
॥ वाचं धेनुमुपासीत ॥
Samskrtam · Value Education · Technology

इट्-योग्याः कृत्-प्रत्ययाः	
क्त, क्तवतुँ	क्त्वा, तुमुन्
तव्य, तव्यत्	तृच्, तृन्

- ३.२.१३९ **ग्लाजिस्थश्च क्स्नुः** - "ग्स्नु" इति कृत्-प्रत्ययः केवलम् ग्लै, जि, स्था, भू एतेभ्यः धातुभ्यः एव विधीयते । एतेषु आदिस्थाः त्रयः अनिट् धातवः । "भू" इति यद्यपि सेट्, तथापि तस्मात् विहितः ग्स्नुप्रत्ययः ७.२.११ श्युकः क्किति इत्यनेन इड्-योग्यः नास्ति ।

- ३.१.१४६ **गस्थकन्** - "थकन्" इति कृत्-प्रत्ययः केवलम् गै इत्यस्मात् धातोः विधीयते । अयम् अनिट् धातुः ।

- ३.३.८८ **ड्वितः क्त्रिः** - "क्त्रि" इति कृत्-प्रत्ययः डुपचँष्, डुलभँष्, डुवपँ, डुभृञ्, डुदाञ्, डुधाञ्, डुमिञ्, डुकृञ्, डुक्रीञ् एतेभ्यः नवभ्यः धातुभ्यः एव विधीयते । एते सर्वे अनिटः धातवः ।

वेट्-धातवः

vyomaa
॥ वाचं धेनुमुपासीत ॥
Samskṛtam · Value Education · Technology

येभ्यः धातुभ्यः विहितस्य इट्-योग्यप्रत्ययस्य विकल्पेन इडागमः भवति, ते **वेटः धातवः** ।

७.२.४४ (२२७९) स्वरतिसूतिसूयतिधूञूदितो वा	स्वृ (भ्वादिः), षूङ् (अदादिः, दिवादिः), धूञ् (स्वादिः, क्र्यादिः), ऊदितः धातवः (यथा - गुपूँ, क्षमूँष्, तक्षूँ, क्षमूँ ... - आहत्य ~२५)
७.२.४५ (२५१५) रधादिभ्यश्च	(दिवादिगणस्य रधादिः अन्तर्गणः, आहत्य ८ धातवः -) रधँ, णशँ, तृपँ, दृपँ, द्रुहँ, मुहँ, ष्णुहँ, ष्णिहँ ।
७.२.४६ (२५६०) निरः कुषः	निर्-उपसर्गपूर्वकः “कृष्” धातुः
७.२.४८ (२३४०) तीषसहलुभरुषरिषः	इषुँ (तुदादिः), षहँ (भ्वादिः), लुभँ (दिवादिः, तुदादिः), रुषँ (भ्वादिः, चुरादिः, दिवादिः), रिषँ (भ्वादिः, दिवादिः) । एतेभ्यः विहितस्य **तकारादिप्रत्ययस्य विकल्पेन इडागमः भवति** । कृत्प्रक्रियायां तु इट्-योग्याः प्रत्ययाः सर्वे तकारादयः एव, अतः कृत्-प्रक्रियायाः सन्दर्भे एते धातवः वेटः एव स्वीकर्तव्याः ।

वेट्-धातोः विहितः निष्ठाप्रत्ययः

vyomaलेख
॥ वाचं धेनुमुपासीत ॥
Samskrtam · Value Education · Technology

१.१.२६ (३०१२) क्तक्तवतू निष्ठा	७.२.१५ (३०२५) यस्य विभाषा
एतौ निष्ठासंज्ञौ स्तः ।	यस्य क्वचित् विभाषया इड् विहितः, ततो निष्ठायाः इट् न स्यात् ।

यदि कस्माच्चित् धातोः विहितस्य कस्यचित् आर्धधातुककृत्प्रत्ययस्य **विकल्पेन** इडागमः उक्तः अस्ति, तस्मात् धातोः विहितौ निष्ठाप्रत्ययौ इट्-अयोग्यौ ज्ञातव्यौ । इत्युक्ते, एतादृशयोः **निष्ठाप्रत्यययोः इडागमः नैव भवति** ।

वेट्-धातुभ्यः विहितस्य इट्-योग्य-प्रत्ययस्य विकल्पेन इडागमः उच्यते ।

(कैश्चन अन्यैः सूत्रैः) केभ्यचन धातुभ्यः विहितस्य विशिष्टप्रत्ययस्य विकल्पेन इडागमः उच्यते ।

एतेभ्यः सर्वेभ्यः धातुभ्यः विहितयोः क्त/क्तवतु-प्रत्यययोः इडागमः न भवति ।

इडागमनिर्णयः - द्वितीयं कोष्ठकम्

vyomaलाभ
॥ वाचं धेनुमुपासीत ॥
Samskrtam · Value Education · Technology

	सेट् धातुः	वेट् धातुः	अनिट् धातुः
क्त्वा, तुमुन्, तव्य, तव्यत्, तृच्, तृन्	इडागमः भवति ।	इडागमः **विकल्पेन** भवति ।	इडागमः **न** भवति ।
क्त, क्तवतुँ	इडागमः भवति ।	इडागमः **न** भवति ।	इडागमः **न** भवति ।
अन्यः कृत्-प्रत्ययः	इडागमः **न** भवति ।	इडागमः **न** भवति ।	इडागमः **न** भवति ।

अयं तु केवलं सामान्यनियमः । अस्यापि अनेके अपवादाः सन्ति ।

अतः **"कस्मात् धातोः विहितस्य कस्य प्रत्ययस्य इडागमः भवति"** इति स्पष्टरूपेण ज्ञातुम् सूत्रपाठस्य इडागमप्रकरणम् एव सम्पूर्णरूपेण अध्येतव्यम् ।

- ७.२.८ नेड् वशि कृति
- ....
- ७.२.७८ ईडजनोर्ध्वे च

इडागमस्य उदाहरणानि

	पठँ (सेट्)	त्रपूँष् (वेट्)	डुकृञ् (अनिट्)
क्त्वा, तुमुन्, तव्य, तव्यत्, तृच्, तृन्	पठित्वा । पठितुम् । पठितव्य । पठितृ ।	त्रप्त्वा, त्रपित्वा । त्रप्तुम्, त्रपितुम् । त्रप्तव्य, त्रपितव्य । त्रप्तृ, त्रपितृ ।	कृत्वा । कर्तुम् । कर्तव्य । कर्तृ ।
क्त, क्तवतु	पठित । पठितवत् ।	त्रप्त । त्रप्तवत् ।	कृत । कृतवत् ।
अनीयर्, ण्वुल्, ल्युट्	पठनीय । पाठक । पठन ।	त्रपणीय । त्रापक । त्रपण ।	करणीय । कारक । करण ।

क्त्वाप्रत्ययस्य इडागमविकल्पः

vyomlabs
॥ वाचं धेनुमुपासीत ॥
Samskrtam · Value Education · Technology

७.२.५६ (३३२८) उदितो वा

उदितः परस्य क्त्वः इड् वा ।

यस्मिन् धातौ औपदेशिकस्वरूपे ह्रस्व-उकारः इत्संज्ञकः अस्ति, तस्मात् विहितस्य क्त्वाप्रत्ययस्य **विकल्पेन इडागमः भवति** ।

- शमुँ (उपशमे) + क्त्वा → शम् + (इट्) + त्वा → शान्त्वा, शमित्वा ।
- ग्रसुँ (अदने) + क्त्वा → ग्रस् + (इट्) + त्वा → ग्रसित्वा, ग्रस्त्वा ।
- प्रुषुँ (दाहे) + क्त्वा → प्रुष् + (इट्) + त्वा → प्रुष्ट्वा , प्रोषित्वा ।
- वृधुँ (वृद्धौ) + क्त्वा → वृध् + (इट्) + त्वा → वृद्ध्वा, वर्धित्वा ।
- ष्ठिवुँ (निरसने) + क्त्वा → ष्ठिव् + (इट्) + त्वा → ष्ठ्यत्वा, ष्ठेवित्वा ।
- क्रमुँ (पादविक्षेपे) + क्त्वा → क्रम् + (इट्) + त्वा → क्रन्त्वा, क्रमित्वा ।

क्त्वाप्रत्ययस्य इड्विकल्पे प्राप्ते निष्ठाप्रत्ययोः ७.२.१५ यस्य विभाषा इति नित्यं इडागमनिषेधः जायते ।

शम् + क्त → शान्त । ग्रस् + क्त → ग्रस्त ।

प्रुष् + क्त → प्रुष्ट । वृध् + क्त → वृद्ध ।

ष्ठिव् + क्त → ष्ठ्यत । क्रम् + क्त → क्रान्त ।

निष्ठाप्रत्यययोः इडागमनिषेधः

vyomaa
॥ वाचं धेनुमुपासीत ॥
Samskrtam · Value Education · Technology

७.२.१४ (३०३९) श्वीदितो निष्ठायाम्	७.२.१६ (३०३६) आदितश्च	७.२.१७ (३०५४) विभाषा भावादिकर्मणोः
श्वयतेः ईदितश्च निष्ठायाम् इट् न ।	आकारेतोः निष्ठायाः इट् न स्यात् ।	भावे आदिकर्मणि चादितो निष्ठाया इड्वा स्यात् ।

ईदित्-धातुभ्यः विहितयोः निष्ठाप्रत्यययोः इडागमः न भवति । आदित्-धातुभ्यः विहितयोः निष्ठाप्रत्यययोः केवलं भावे आदिकर्मणि च विकल्पेन इडागमः भवति, अन्यत्र न भवति ।

- टुओँश्वि (गतिवृद्ध्योः) → शून, शूनवत् ।
- कटीँ (गतौ) → कट्ट, कट्टवत् ।
- क्ष्मायीँ (विधूनने) → क्ष्मात, क्ष्मातवत् ।
- नृतीँ (गात्रविक्षेपे) → नृत्त, नृत्तवत् ।

- ष्ठिवदाँ (अव्यक्ते शब्दे) → ष्ठिवण्ण / ष्ठ्वेदित, ष्ठिवण्णवत् / ष्ठ्वेदितवत् ।
- जिमिदाँ (स्नेहने) → मिन्न / मेदित, मिन्नवत् / मेदितवत् ।
- स्फुर्छाँ (विस्तृतौ) → स्फूर्ण / स्फुर्छित, स्फूर्णवत् / स्फूर्छितवत् ।
- जिफलाँ (विशरणे) → फुल्ल / फलित, फुल्लवत् / फलितवत् ।

कित्, गित् प्रत्ययानाम् इडागमनिषेधः

vyomaa
॥ वाचं धेनुमुपासीत ॥
Samskrtam · Value Education · Technology

७.२.११ (२३८१) श्र्युकः क्किति

श्रियः एकाचः उगन्ताचः परयोः गिक्कितोः इट् न स्यात् ।

श्रिञ् (सेवायाम्) इत्यस्मात् धातोः, तथा च "उक्" प्रत्याहारस्य वर्णः यस्य अन्ते विद्यते, तस्मात् एकाचः धातोः विहितानां कित्/गित्-प्रत्ययानाम् (क्त्वा, क्त, क्तवतुँ, ग्स्नु - इत्येतेषाम्) इडागमः न भवति ।

उकारान्तधातवः	ऊकारान्तधातवः	ऋकारान्तधातवः	ॠकारान्तधातवः	"श्रि" धातुः
यु → युत्वा, युत, युतवत् । **रु** → रुत्वा, रुत, रुतवत् । **क्ष्णु** → क्ष्णुत्वा, क्ष्णुत, क्ष्णुतवत् ।	**लू** → लूत्वा, लून, लूनवत् । **भू** → भूत्वा, भूत, भूतवत्, भूष्णु । **सू** → सूत्वा, सूत, सूतवत् । वेट्-सत्यपि उगन्तन्त्वात् इण्णिषेधः ।	वृ → वृत्वा, वृत, वृतवत् । पृ → पृत्वा, पृत, पृतवत् । स्वृ → स्वृत्वा, स्वृत, स्वृतवत् । वेट्-सत्यपि उगन्तन्त्वात् इण्णिषेधः ।	तॄ → तीर्त्वा, तीर्णः, तीर्णवत् । पॄ → पूर्त्वा, पूर्त, पूर्तवान् । कॄ → कीर्त्वा, कीर्ण, कीर्णवान् ।	श्रि → श्रित्वा, श्रित, श्रितवत् ।

इडागमनिर्णयः - तृतीयं कोष्ठकम्

	धातोः प्रथमपरीक्षणम्					(आवश्यकं चेत्) धातोः द्वितीयपरीक्षणम्		
	आदित्	ईदित्	उदित्	उगन्तः	अन्यः	अनिट्	वेट्	सेट्
तुमुन्, तव्य, तव्यत्, तृच्, तृन्	२	२	२	२	२	✗	🤔	✓
क्त्वा	२	२	🤔	✗	२	✗	🤔	✓
क्त, क्तवतु (भावे, आदिकर्मणि)	🤔	✗	✗	✗	२	✗	✗	✓
क्त, क्तवतु (कर्मणि)	✗	✗	✗	✗	२	✗	✗	✓
अन्यः कृत्प्रत्ययः	✗	✗	✗	✗	✗	✗	✗	✗

एते केवलं सामान्यनियमाः । विशिष्टधातोः विषये विशेषः नियमः पाठ्यते चेत् तस्य चिन्तनं प्राधान्येन करणीयम् ।

अभ्यासः

vyoma
॥ वाचं धेनुमुपासीत ॥
Samskṛtam · Value Education · Technology

http://bit.ly/sk-kridanta-exercises

अष्टाध्यायीजगन्माता यस्य चित्तात् समुत्थिता
वेदानामुपकाराय तस्मै पाणिनये नमः ॥

शब्दब्रह्म समाराध्य कृतवान् यो विलक्षणम्
सर्वाश्चर्यमिदं शास्त्रं तस्मै पाणिनये नमः ॥

येन धौता गिरः पुंसां विमलैः शब्दवारिभिः
तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः ॥

QUESTIONS/DOUBTS?

Email us @

sanskritfromhome

@vyomalabs.in

- For downloading course-materials, login @ www.sanskritfromhome.in
- Subscribe to our youtube channel @ vyoma-samskrta-pathasala
- Buy our Samskrita-learning products @ www.digitalsanskritguru.com
- Support our cause for Samskrita-Samskriti @ www.vyomalabs.in

© All the content in this presentation is the intellectual property of Vyoma Linguistic Labs Foundation.

All materials shared in our website are purely for the purpose of personal study.

Replication/reuse in any form without written permission from the organisation is prohibited.